यौकारं च ककारं च अनुस्वारसमायुतम्।
ककारं च मकारं च फकारं च सिकारकम्।।२८।।

अनुस्वारसमायुक्तं गकारं च भकारकम्।
ऋकारं च भकारं च मकारेण समुच्चयम्।।२९।।

अकारं चैव वाकारं हकारं च भकारकम्।
शिकारं च लकारं च मकारं हारमेव च।।३०।।

क्षकारं च उकारं च ककारं च एकारकम्।
नकारेण समायुक्तो बन्धशब्द उदाहृतः।।३१।।

पूर्णं चैव तु पूर्णं च कह-कह-समायुतम्।
किरिद्वन्द्वसमायुक्तं सूक्ष्म-सूक्ष्म-समायुतम्।।३२।।

इकारं च दकारं च रिकारो हारमेव च।
चकारं च मकारं च उकारं च प्रकाशकम्।।३३।।

विकारं च शकारं च स ष चैव दुकारकम्।
फट्कारं स्तम्भयश्चेति स्तम्भशब्दं तथैव च।।३४।।

यकारं चैव हुङ्कारं फट्कारेण समायुतम्।
एवं कवचमाख्यातं सर्वरक्षाकरं भवेत्।।३५।।

अस्त्रमन्त्रः

प्रकारं च स्फुकारं च रकारं च स्फुकारकम्।
रकारं चैव विन्यस्य घोरं चैव तु घोरकम्।।३६।।

एकार और नकार से संयुक्त कर तब बन्ध, पूर्ण पूर्ण, कह, कह, किरि किरि, सूक्ष्म सूक्ष्म शब्दों को जोड़े। तब इकार, दकार, रिकार, हार, चकार, मकार, उकार, प्रकाश, विकार, शकार, सकार, षकार, दुकार, फट्कार, स्तम्भय स्तम्भय, यकार, हुंकार और अन्त में फट् शब्द से संयुक्त करे। इस तरह से कवच मन्त्र का स्वरूप बनता है। सभी प्रकार के रक्षा कार्यों में इसका विनियोग होता है॥२४-३५॥

प्रकार के आगे स्फुर स्फुर शब्दों का विन्यास करे। आगे घोर, घोरतर और घोरतम रूप शब्दों का न्यास करे। तब चट चट, प्रचट प्रचट, कह कह, वम वम, घातय घातय शब्दों को रखकर अन्त में हुँ फट् स्वाहा शब्दों को जोड़े। तब अस्त्र मन्त्र का स्वरूप इस तरह से बनता है — प्रस्फुर प्रस्फुर घोर-घोरतर-घोरतमरूप चट चट प्रचट प्रचट कह कह वम वम घातय घातय हुँ फट् स्वाहा। इस तरह यहाँ पाँच विद्यांग मन्त्रों का स्वरूप

तकारं चैव विन्यस्य मकारं चैव विन्यसेत् ।
तकारं च मकारं च रूकारं च पकारकम् ।।३७।।

चटश्चैव चटश्चैव प्रचटः प्रचटस्तथा ।
कहश्चैव कहश्चैव वमश्चैव वमस्तथा ।।३८।।

घातय घातय चैव हुंफट्कारसमायुतम् ।
स्वाहाकारेण संयुक्तो मन्त्रो हेतिरुदाहृतः ।।३९।।

एवं विद्याङ्गमाख्यातं शक्त्यङ्गानि ततः शृणु ।

५. शक्त्यङ्गनिरूपणम्

आधारशक्तिबीजं च बिन्दुनादसमन्वितम् ।।४०।।

प्रथमं बीजमित्युक्तं पीताभं शक्तिबीजकम् ।
बिन्दुनादसमायुक्तं द्वितीयं बीजमुच्यते ।।४१।।

ऊकारं शक्तिबीजं च बिन्दुनादसमन्वितम् ।
तृतीयं बीजमित्युक्तमैकारं शक्तिसंयुतम् ।।४२।।

कार्यकारणसंयुक्तं चतुर्थं बीजमुच्यते ।
शक्तिश्चतुर्दशोपेता शिवशक्तिसमायुता ।।४३।।

पञ्चमं बीजमाख्यातं स्वरान्तं शक्तिसंयुतम् ।
वर्णं चैव सुसंयुक्तं षष्ठकं बीजमुच्यते ।।४४।।

बताया गया है।।३५-४०।।

अब शक्ति के अंगों के विषय में सुनो। आधारबीज सकार को शक्तिबीज आकार से एवं बिन्दु-नाद से संयुक्त करने पर **सां** यह प्रथम शक्तिबीज बनेगा। ई को इसका पर्याय माना गया है। पीताभ ईकार, शक्तिबीज सकार और बिन्दु-नाद के संयोग से बना **सीं** यह द्वितीय शक्तिबीज बनेगा। ऊकार के साथ इनका संयोग होने पर **सूँ** यह तृतीय बीज, ऐकार से संयोग होने पर **सैं** यह चतुर्थ बीज, औकार से इनका योग होने पर **सौं** यह पंचम बीज तथा अ:कार से मिलने पर षष्ठ **सः** बीज बनेगा। ये शक्ति के छ: अंगबीज बनते हैं। इस प्रकार यहाँ इन छ: शक्त्यंगों का वर्णन किया गया है।।४०-४५।।

अब षड्विध सामान्य अंगों का परिचय दिया जा रहा है। आदिवर्ग से सोलह स्वर वाला प्रथम वर्ग गृहीत होता है। उसमें अश्विनी से दूसरे स्वर आकार का, वेद से चतुर्थ स्वर ईकार का, रस से छठे स्वर ऊकार का, भानु (आदित्य) से बारहवें स्वर ऐकार का,

एवं शक्त्यङ्गमाख्यातं सामान्याङ्गमथोच्यते ।

६. सामान्याङ्गनिरूपणम्

आदिवर्गेऽश्विनौ वेदा रसो भानुर्मनुस्तथा ।
ब्रह्मविष्णुसुरेन्द्राश्च आदित्येन्दुगुहास्तथा ।।४६।।

मदनक्षेत्रविघ्नेशाश्चाष्टमूर्तिर्वसुस्तथा ।
विद्येशास्त्रगणेशाश्च लोकपालायुधानि च ।।४७।।

सिद्धविद्याधराश्चैव गन्धर्वाप्सरसस्तथा ।
यक्षकिन्नरभूताश्च ऋषयः खेचरास्तथा ।।४८।।

अन्येषां सर्वदेवानां स्वनामाद्यक्षरं तथा ।
सामान्येषु समायोगाद् बिन्दुनादसमन्वितम् ।।४९।।

तेषामङ्गानि चोक्तानि मूलं तद्बीजमुच्यते ।
सामान्याङ्गमिदं प्रोक्तं तेषां वर्णमथोच्यते ।।५०।।

अङ्गवर्णाः

हृदयं शुक्लवर्णं स्यात् पीतवर्णं शिरस्तथा ।
शिखां रक्तसमां विद्यात् कवचं स्फटिकप्रभम् ।।५१।।

मनु से चौदहवीं संख्या के औकार का और षोडश से सोलहवें स्वर अ:कार का ग्रहण किया जाता है। ये छ: स्वर सभी देवताओं के सामान्य अंग माने गये हैं। ब्रह्मा, विष्णु, इन्द्र, आदित्य, चन्द्र, गुह (स्कन्द), मदन (कामदेव), क्षेत्रपाल, विघ्नेश, भव आदि शिव की आठ मूर्तियाँ, धरा आदि आठ वसुगण, श्रीकण्ठ आदि आठ विद्येश, गणेश्वर, लोकपाल, आयुधसमूह, सिद्ध, विद्याधर, गन्धर्व, अप्सरा, यक्ष, किंनर, भूत, ऋषि, आकाशगामी देवगण और अन्य भी सभी देवगणों के अपने-अपने नामों के प्रारंभ के अक्षरों से इन छ: स्वरों को जोड़ने से ये उनके बीजाक्षर बन जाते हैं। इसीलिये ये छ: स्वर सामान्यांग कहलाते हैं। इनके साथ भी बिन्दु और नाद का संयोजन किया जाता है। इन सब देवताओं के मूलबीज तो वे ही होंगे, जिनका वर्णन वर्णपटल में किया गया है। इस प्रकार सामान्यांग का वर्णन पूरा होता है।।४५-५०।।

अब इन सबके वर्णों (रंगों) का परिचय दिया जा रहा है। इनमें हृदयबीज का वर्ण शुक्ल, शिरोबीज का पीत, शिखा का लाल, कवच का स्फटिकाभ, नेत्र का काला और अस्त्र का वर्ण भी काली आभा वाला होता है। छ: शिवांगों के ये षड्विध वर्ण हैं।।५०-५२।।

अब भूतांगों के वर्ण बताये जा रहे हैं। पीत, शुक्ल, अरुण, कृष्ण, धूम्र और लाल ये क्रमशः भूतांगों के हृदय आदि के वर्ण माने गये हैं।।५२-५३।।

नेत्रं श्यामनिभं विद्यात् कृष्णाभं चास्त्रमुच्यते ।
एवं शिवाङ्गमाख्यातं भूताङ्गं च तथोच्यते ।।५२।।

पीतं शुक्लारुणं चैव कृष्णं धूम्रं च पावकम् ।
भूताङ्गानि तु वर्णानि समासात् कीर्तितानि तु ।।५३।।

श्वेतं रक्तं तथा नीलं कुङ्कुमं पीतमञ्जनम् ।
कूटाङ्गानां तु वर्णानि समासादुदितानि तु ।।५४।।

जपाकुसुमकुन्दाभं पावकं चेन्द्रनीलकम् ।
सिन्दूरं हरितालं च विद्याङ्गानां नभस्तथा ।।५५।।

पीतं श्यामं तथा रक्तं कृष्णं मरकतं तथा ।
एतैरेव सवर्णानि शक्त्यङ्गानां क्रमेण तु ।।५६।।

स्फाटिकं रक्तपीतं च श्यामं स्यात् काञ्चनारुणम् ।
एतान्युक्तानि वर्णानि सामान्याङ्गं प्रकीर्तितम् ।।५७।।

ध्यानस्वरूपम्

चतुर्भुजं त्रिणेत्रं च जटामुकुटमण्डितम् ।
सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् ।।५८।।

त्रिशूलमभयं सव्ये कपालं वरमन्यके ।
हारकेयूरसंयुक्तं कटकैः कुण्डलैर्युतम् ।।५९।।

इसी तरह से श्वेत, रक्त, नील, कुंकुम, पीत और अंजन (कृष्ण) — ये छः वर्ण कूटांगों में स्थित हृदय आदि के वर्ण हैं। विद्यांगों के वर्ण जपाकुसुम, कुन्दपुष्प, पावक, इन्द्रनील, सिन्दूर और हरिताल के सदृश हैं। इसी तरह शक्ति के हृदय आदि अंगों के वर्ण नील, पीत, श्याम, रक्त, कृष्ण और मरकतसदृश हैं। अब छः सामान्य अंगों के वर्णों का क्रम बताया जा रहा है। इनके वर्ण क्रमशः स्फटिकसदृश, रक्त, पीत, श्याम, कांचन और अरुण हैं। इस प्रकार शिवांग आदि षड्विध अंगों में स्थित हृदय आदि षड्विध अंगों के षड्विध वर्णों का क्रमशः यहाँ वर्णन किया गया है।।५४-५७।।

चार भुजा और तीन नेत्रों से सुशोभित, जटा और मुकुट से मंडित, सभी लक्षणों से समन्वित और सभी प्रकार के आभूषणों से सुशोभित, दक्षिण के दो हाथों में त्रिशूल और अभय मुद्रा तथा बायें दो हाथों में कपाल और वरमुद्रा को धारण किये, हार, केयूर, कटक और कुण्डल से सुशोभित, हृदय आदि अंगों से लेकर उनके वर्णों तक वर्णित यह स्वरूप सौम्य माना गया है। बाकी सभी स्वरूप रौद्र माने गये हैं।।५८-६०।।

हृदादिवर्मपर्यन्तं स्वरूपं सौम्यमुच्यते ।
शेषा रौद्रा इति ज्ञेयाः सर्वेषां रूपमीरितम् ।।६०।।

यजनम्

शिवाङ्गैस्तु यजेद् देवं स्थापनादीनि सर्वशः ।
भूताङ्गैश्चैव षड्वक्त्र पादादिभूतशोधनम् ।।६१।।
अणौ नामानि संयोज्य भूताङ्गेषु समाचरेत् ।
कूटाङ्गैश्चैव विद्याङ्गैः प्रायश्चित्तं तु कारयेत् ।।६२।।
शक्तीनां स्थापनाकाले शक्त्यङ्गैस्तु समाचरेत् ।
अन्येषां सर्वदेवानां सामान्याङ्गैस्तु योजयेत् ।।६३।।
एवं षडङ्गमाख्यातं विशेषस्त्वधुनोच्यते ।

पञ्चधा हृदयम्

केवलं ज्ञानजं चैव योगजं भूतजं तथा ।।६४।।
कामदं च क्रमेणैव हृदयं पञ्चधा भवेत् ।
शिवाङ्गं हृदयं यत्तु केवलं समुदाहृतम् ।।६५।।

षड्विध शिवांगों से इष्टदेवता की पूजा की जाती है और प्रतिष्ठा आदि क्रियाओं को सम्पन्न किया जाता है। हे षण्मुख ! भूतांगों से पाद से मस्तक पर्यन्त स्थित भूतों की शुद्धि की जाती है। यहाँ मन्त्रोच्चारण के साथ भूतों के नामों का भी संयोजन किया जाता है। कूटांग और विद्यांग मन्त्रों का विनियोग प्रायश्चित्त के लिये किया जाता है। उमा आदि शक्तियों की स्थापना करते समय शक्त्यंग मन्त्रों का और अन्य देवताओं की स्थापना में सामान्यांग मन्त्रों का उपयोग किया जाता है। इस तरह से षडंग मन्त्रों का यहाँ सामान्य विधान बताया गया है।।६१-६४।।

अब इनका विशेष विधान बताया जा रहा है। केवल, ज्ञानज, योगज, भूतज और कामज के भेद से हृदय के पाँच भेद होते हैं। इनमें शिवांग के रूप में वर्णित **हाँ** बीज को केवलहृदय कहा जाता है। सान्त हकार को यान्त रेफ, आदिवर्गान्त औकार और बिन्दु से संयुक्त करने पर जो **हौं**-बीज बनता है, उसे ज्ञानजहृदय कहते हैं। भूतान्त हकार को अनिलबीज यकार और अकार स्वर से संयुक्त करने पर **ह्य**-बीज बनता है। इसी तरह से अन्य तत्त्वान्त हकार को अकार से संयुक्त करने पर **ह**-बीज बनेगा। इन दोनों को बिन्दु और नाद से संयुक्त करने पर **ह्यँ हँ** इस तरह से योगजहृदय बीज बनता है।। पंचम हकार को

सान्तं यान्तसमायुक्तमादिवर्गान्तसंयुतम् ।
ज्ञानात्महृदयं बिन्दुः समासात् परिकीर्तितम् ।।६६।।

भूतान्तमनिलोपेतं तत्त्वान्तं स्वरसंयुतम् ।
शिवशक्तिसमायुक्तं योगजं हृदयं विदुः ।।६७।।

पञ्चमं पार्थिवोपेतं द्वितीयस्वरसंयुतम् ।
बिन्दुनादसमायुक्तं भूतजं हृदयं विदुः ।।६८।।

तत्त्वान्तमनिलान्तं च दशान्तान्तकलान्वितम् ।
बिन्दुनादसमायुक्तं हृदयं सर्वकामदम् ।।६९।।

हृदयादि नमोऽन्तं तु सर्वेषां सह योजयेत् ।

हृदयस्वरूपम्

ईशानं प्रथमं विद्याच्छुक्लवर्णमुदाहृतम् ।।७०।।

ईश्वरं ज्ञानहृदयं तप्तकाञ्चनसन्निभम् ।
योगजं ब्रह्मरूपं स्यात् पीतवर्णं तु निर्दिशेत् ।।७१।।

भूतजं चेशरूपं तु रक्तवर्णमुदाहृतम् ।
सादाख्यं कामदं विद्याच्छुद्धस्फटिकसन्निभम् ।।७२।।

विनियोगः

यजनं केवलेनैव स्थापनं ज्ञानजेन तु ।
प्रोक्षणं योगजेनैव दीक्षाकर्म तु भूतजम् ।।७३।।

पार्थिव बीज लकार और द्वितीय स्वर आकार से तथा बिन्दु-नाद से संयुक्त करने पर ह्लाँ-बीज का निर्माण होता है। इसको भूतजहृदय बीज कहते हैं।। तत्त्वान्त हकार को अनिलान्त रेफ और दशान्तान्त कला, अर्थात् ऐकार स्वर से संयोजित करने पर जो ह्रैं-बीज बनता है, उसे कामदहृदय बीज कहते हैं। इन सबके साथ हृदयाय नमः शब्दों को जोड़ना चाहिये। तब उनका यह स्वरूप बनेगा — १. ह्लाँ केवलहृदयाय नमः, २. ह्रौं ज्ञानजहृदयाय नमः, ३. ह्यं हँ योगजहृदयाय नमः, ४. ह्लाँ भूतजहृदयाय नमः, ५. हैं कामदहृदयाय नमः। इनमें प्रथम मन्त्र ईशानस्वरूप और शुक्ल वर्ण का है। दूसरा ईश्वरस्वरूप ज्ञानजहृदय तपे हुए सोने के समान पीत वर्ण का है। तीसरा योगजहृदय ब्रह्मस्वरूप एवं पीत वर्ण का है। चौथा भूतजहृदय ईशस्वरूप एवं रक्त वर्ण का है और पाचवाँ कामदहृदय सादाख्यस्वरूप एवं शुद्ध स्फटिक के सदृश वर्ण का है। इनमें से केवलहृदय से पूजन, ज्ञानज से स्थापन, योगज से प्रोक्षण, भूतज से दीक्षा कर्म और कामद से सभी काम्य कर्मों का अनुष्ठान किया

सर्वकर्म विशेषेण कामदेनैव कारयेत्।
एवं हृदयमाख्यातमस्त्रभेदमथ शृणु ।।७४।।

पञ्चास्त्राणि

शिवास्त्रं क्षुरिकास्त्रं च तथा पाशुपतास्त्रकम्।
व्योमास्त्रं चैवाघोरास्त्रमस्त्रं पञ्चविधं भवेत् ।।७५।।

षडक्षरं शिवास्त्रं स्यात् क्षुरिका त्वष्टवर्णकम्।
पाशुपतं च पञ्चार्णं व्योमास्त्रं तु दशार्णकम् ।।७६।।
चत्वारिंशदघोरास्त्रमेवं पञ्चास्त्रमुच्यते।
सर्वकर्मार्हकं विद्यात् पूजकः सर्वकर्मसु ।।७७।।
शिवाङ्गादि षडङ्गानि कीर्तितानि षडानन।
अङ्गभेदो मयाख्यातो मन्त्रजातमथ शृणु ।।७८।।

।। इति श्रीवातुले शुद्धाख्यतन्त्रेऽङ्गभेदो नाम
अष्टमः पटलः समाप्तः ।।

जाता है। इस तरह से यहाँ पंचविध हृदय- बीजों का उद्धार बताया गया है।।६४-७४।।

अब अस्त्र मन्त्र के भेदों को बताया जा रहा है। शिवास्त्र, क्षुरिकास्त्र, पाशुपतास्त्र, व्योमास्त्र और अघोरास्त्र के भेद से अस्त्र-मन्त्र पंचविध माने गये हैं। शिवास्त्र छः अक्षरों का, क्षुरिकास्त्र आठ अक्षरों का, पाशुपतास्त्र पांच अक्षरों का, व्योमास्त्र दस अक्षरों का और अघोरास्त्र चालीस अक्षरों का होता है। इस तरह से पंचास्त्र-मन्त्रों की वर्णसंख्या यहाँ बताई गई है। शास्त्र के अनुसार अपने इष्टलिंग की पूजा करने वाला साधक सभी कर्मों में इनका विनियोग कर सकता है, क्योंकि ये अस्त्र-मन्त्र सभी कामनाओं को पूरा करने वाले हैं।।७४-७७।।

इस प्रकार प्रस्तुत पटल में शिवांग आदि षड्विध अंगों का परिचय दिया गया है। अंगभेद का परिचय देने के बाद अब मैं अगले पटल में मन्त्रों का परिचय देने जा रहा हूँ।।७८।।

।। इस तरह से श्री वातुलशुद्धाख्य तन्त्र का यह अंगभेद नामक
अष्टम पटल पूरा हुआ ।।८।।

❋❋❋

नवमः पटलः

मन्त्रमयलिङ्गोद्धारक्रमः

अथातः संप्रवक्ष्यामि मन्त्रजातविधिं शृणु ।
यस्मान्मन्त्राश्च जायन्ते मन्त्रजातमिति स्मृतम् ।।१।।

तस्मान्मन्त्रमयं लिङ्गं वक्ष्ये संक्षेपतः शृणु ।
सर्वलोकहितार्थाय सर्वप्राणिहिताय च ।।२।।

सर्वमन्त्रप्रसिद्ध्यर्थं भुक्तिमुक्त्यर्थमुच्यते ।
शालिपिष्टाक्तसूत्रेण सूत्रपातमथाचरेत् ।।३।।

गोमयालेपिते क्षेत्रे निम्नोन्नतविवर्जिते ।
प्राक्सूत्राणि सप्तदश तथैवोदग्गतानि च ।।४।।


पङ्क्तयः षोडश स्युस्ताः प्रागुत्तरमुखास्तथा ।
षट्पञ्चाशत्समाधिक्यकोष्ठानि द्विशतानि च ।।५।।

पश्चिमादिन्द्रपर्यन्तं लिङ्गार्थं वीथिकास्त्यजेत् ।
पश्चात् चत्वारि चत्वारि वीथ्योः कोष्ठानि मध्यमे ।।६।।

अब मैं मन्त्रजात की विधि को कहूँगा। उसे तुम सावधानी से सुनो। मन्त्रजात का अर्थ है, वह लिंग तत्त्व, जिससे सभी प्रकार के मन्त्रों का उद्धार होता है। इस मन्त्रमय लिंग तत्त्व का स्वरूप ही यहाँ संक्षेप में बताया जा रहा है। समस्त लोकों के और उनमें रहने वाले समस्त प्राणियों के कल्याण के लिये, सभी प्रकार के मन्त्रों का उद्धार करने के लिये तथा सभी प्रकार के भोगों के साथ मुक्ति को प्राप्त कराने में भी ये मन्त्र समर्थ हैं, इसलिये इस प्रकरण का उपदेश किया जा रहा है।।१-३।।

चावल के आटे को धागे में लपेट कर समतल भूमि को गोबर से लीप कर उस पर सूत्रपात करना चाहिये। ऐसा करने से सूत्र (धागे) पर लगे आटे से रेखाएँ बन जाती हैं। पूर्व से पश्चिम तक तथा दक्षिण से उत्तर तक इस तरह सत्रह-सत्रह वार सूत्रपात करने पर पूर्व से पश्चिम तक तथा दक्षिण से उत्तर तक सोलह-सोलह कोष्ठकों का और कुल मिलाकर दो सौ छप्पन कोष्ठकों का निर्माण हो जाता है।।३-५।।

मन्त्रमयलिङ्गोद्धार



संरक्ष्य पार्श्वद्वितये षट् षट् कोष्ठानि लोपयेत् ।
तदूर्ध्वपङ्क्तिं संरक्ष्य तदूर्ध्वे द्वादश क्षिपेत् ।।७।।

पार्श्वयोरुभयोस्तत्र द्वे द्वे कोष्ठे च लोपयेत् ।
तदूर्ध्वे दश कोष्ठानि रक्षेत् पार्श्वत्रयं त्यजेत् ।।८।।

ततः षट्कोष्ठकं रक्षेत् पार्श्वयोः पञ्च पञ्च च ।
लोपयेच्च तदूर्ध्वे तु रक्षेच्चत्वारि पार्श्वयोः ।।९।।

षट्षट्कोष्ठानि संत्यज्य तदूर्ध्वे तद्वदाचरेत् ।
ततः षट्कोष्ठकं रक्षेत् पार्श्वयोः पञ्च लोपयेत् ।।१०।।

तदूर्ध्वे दश संरक्ष्य पार्श्वयोस्त्रीणि लोपयेत् ।
तदूर्ध्वे द्वादशं रक्षेद् द्वे द्वे पार्श्वे च लोपयेत् ।।११।।

तदूर्ध्वपङ्क्तिं संरक्ष्य ततो लिङ्गं द्विपङ्क्तितः ।
पङ्क्त्योश्चत्वारि चत्वारि कोष्ठान्यूर्ध्वे च रक्षयेत् ।।१२।।

इनमें पश्चिम दिशा से लेकर पूर्व दिशा तक की वीथिकाओं को लिंग के निर्माण के लिये छोड़ दे। बाद में इन सोलह पंक्तियों के बीच की दो दो वीथियों के चार चार कोष्ठकों को सुरक्षित रखकर इनके दोनों तरफ के छः छः कोष्ठकों को मिटा दे। इन मिटाई गई दोनों पंक्तियों के ऊपर जो पंक्ति विद्यमान है, उसे सुरक्षित रखकर उसके ऊपर के बारह कोष्ठकों को रहने दे। यह सुरक्षित बारह कोष्ठक वाली पंक्ति के दोनों तरफ के दो दो काष्ठकों को मिटा दे। उस बारह कोष्ठक (पद) वाली पंक्ति के ऊपर वाली पंक्ति के दस पदों को सुरक्षित रखकर उस पंक्ति के दोनों तरफ के तीन तीन कोष्ठकों को मिटा दे। इसके बाद दस पद वाली पंक्ति के ऊपर की पंक्ति में स्थित छः पदों को सुरक्षित कर उस पंक्ति के दोनों तरफ के पाँच-पाँच पदों को मिटा दे। इसके ऊपर वाली पंक्ति के चार पदों को रखकर उसकी दोनों तरफ के छः छः पदों को मिटा दे। इसके ऊपर की पंक्ति में भी पूर्ववत् चार-चार पदों को रखकर उसकी दोनों तरफ के छः छः पदों को मिटा दे। इसके बाद पूर्व में सुरक्षित चतुष्पद पंक्ति के ऊपर वाली पंक्ति के छः पदों को रखकर उसकी दोनों तरफ के पाँच-पाँच कोष्ठकों (पदों) को मिटा दे। पूर्व में सुरक्षित षट्पद वाली पंक्ति के ऊपर दस पदों को सुरक्षित रखकर उस पंक्ति के दोनों तरफ के तीन-तीन कोष्ठकों को मिटा दे। उस दस पदों वाली पंक्ति के ऊपर की पंक्ति के बारह पदों को बचा कर उसकी दोनों तरफ के दो दो पदों को मिटा दे। इसी तरह इस बारह पदों वाली पंक्ति की ऊपर वाली पंक्ति के सभी सोलह पदों को सुरक्षित रख ले। ऊपर की दो पंक्तियों से लिंग का आकार स्पष्ट हो जाता है। पूर्व में सुरक्षित सोलह पदों वाली पंक्ति के ऊपर की दोनों पंक्तियों के चार-चार पदों का बचाकर उन दोनों पंक्तियों की दोनों तरफ के छः छः पदों को मिटा दिया जाता है। इस

षट्षट्कोष्ठानि पङ्क्त्योश्च पार्श्वयोरुभयोस्त्यजेत् ।
एवं लिङ्गं समासाद्य ब्रह्मविष्ण्वीशपीठकम् ।।१३।।

लिङ्गपीठषडङ्गानि

पट्टिकाकञ्जकण्ठाब्जपट्टिकाज्यप्रधारिका: ।
षडङ्गानि च पीठस्य क्रमात् प्रोक्तानि षण्मुख ।।१४।।

लिङ्गे मन्त्रन्यासक्रम:

मन्त्रन्यासक्रमं लिङ्गे शृणु वत्स समासत: ।
अङ्गभेदे षडङ्गानि प्रोक्तमन्त्राणि विन्यसेत् ।।१५।।

हृदयं पट्टिकायां तु शिर: कञ्जे शिखां गले ।
कवचं कमले नेत्रं पट्यामस्त्रं च धारिके ।।१६।।

प्रोक्त: षडङ्गविन्यासो वक्ष्याम्याधारषट् क्रमात् ।

षट्चक्रन्यासक्रम:

कञ्जस्य चाध आधारं वादिसान्तं चतुर्दले ।।१७।।

स्वाधिष्ठाने च षट्पत्रे बादिलान्तं क्रमान्न्यसेत् ।
ततो मणौ दशदले डादिफान्तं न्यसेत् तत: ।।१८।।

तरह से यहाँ बताई गई विधि के अनुसार सृष्टि-स्थिति-संहार के कर्ता ब्रह्म-विष्णु-महेश स्वरूप लिंग का आकार बन जाता है।।६-१३।।

हे षण्मुख ! इस लिंगपीठ के अध:पट्टिका, अध:कंज, कण्ठ, ऊर्ध्वाब्ज, ऊर्ध्वपट्टिका और आज्यप्रधारिका नामक छ: अंग शास्त्रों में बताये गये हैं। इस लिंग में मन्त्रों के न्यास के प्रकार को अब मैं संक्षेप में बता रहा हूँ, उसे तुम ध्यान से सुनो। पूर्वोक्त अंगभेद नामक अष्टम पटल में षडंग मन्त्रों का स्वरूप बताया गया है। उनके विन्यास का क्रम यहाँ बताया जा रहा है। अध:-पट्टिका में हृदय मन्त्र का, अध:कमल में शिरोमन्त्र का, वृत्तस्थान में शिखा मन्त्र का, ऊर्ध्वकमल में कवच मन्त्र का, ऊर्ध्वपट्टिका में नेत्र मन्त्र का और आज्यप्रधारिका में अस्त्र मन्त्र का विन्यास किया जाता है।।१४-१६।।

इस तरह से षडंग-मन्त्रों के न्यास का प्रकार बताया गया है। अब षड्विध आधारों के न्यास का क्रम बताया जा रहा है। अध:पट्टिका को यहाँ आधार-स्थान माना गया है। चार पद वाले इस चतुर्दल कमल में व श ष स इन चार वर्णों की स्थिति रहती है। छ: पत्र वाले स्वाधिष्ठान चक्र की अध:कमल में स्थिति मानी गई है और इसमें बकार से लेकर लकार पर्यन्त वर्णों का विन्यास किया जाता है। इसके ऊपर मणिपूर चक्र के दस दलों में डकार से लेकर फकार पर्यन्त दस वर्णों का विन्यास किया जाता है। बारह दल वाले

हृदये द्वादशदले कादिठान्तं न्यसेत् ततः ।
पट्यां कण्ठे षोडशक आदिवर्गं न्यसेत् ततः ।।१९।।

आज्ञायां द्विदले चोर्ध्वं ळक्षयुग्मं न्यसेत् ततः ।
एतानि शिवचक्राणि शक्तिचक्राण्यथो न्यसेत् ।।२०।।

आधारादिगलान्तं च वर्णानि पूर्ववन्न्यसेत् ।
आज्ञायां तु विशेषोऽस्ति शक्तिपक्षे हळे शृणु ।।२१।।

वर्णाधिदेवतास्तत्र पूर्ववत् परिकल्पयेत् ।
एवं षट्चक्रमाख्यातं मूर्तिमन्त्रं न्यसेत् ततः ।।२२।।

मूर्तिमन्त्रन्यासक्रमः

नादं लिङ्गे च विन्यस्य बिन्दुमाज्यप्रधारिके ।
पट्यादिकञ्जपर्यन्तं मकारं विन्यसेत् ततः ।।२३।।

वृत्ते तूकारं विन्यस्य अकारं कञ्जपट्टके ।
सूक्ष्मपञ्चाक्षरं प्रोक्तं स्थूलपञ्चाक्षरं शृणु ।।२४।।

हृदयकमल में ककार से लेकर ठकार पर्यन्त बारह वर्णों का विन्यास किया जाता है। सोलह वर्णों वाले कण्ठचक्र की ऊर्ध्वपट्टिका में स्थिति है। यहाँ अकार आदि सोलह स्वरों का विन्यास किया जाता है। दो दल वाले आज्ञाचक्र की स्थिति आज्यधारिका में मानी गई है। यहाँ ळ और क्ष नामक दो वर्णों का विन्यास किया जाता है। इस तरह से यहाँ षट्चक्रों में विन्यस्त इक्यावन वर्ण मुख्य रूप से रुद्रबीज माने गये हैं।।१७-२०।।

इन वर्णों का शक्तिचक्र के रूप में भी न्यास किया जाता है। उसकी विधि सुनो। आधार आदि चक्रों में इन वर्णों का विन्यास पूर्ववत् किया जाता है। केवल आज्ञाचक्र में वर्णों के न्यास में यह विशेषता बताई गई है कि यहाँ ळ और क्ष के स्थान पर ह और ळ वर्णों का न्यास किया जाता है। इन द्विविध वर्णों के अधिपति देवता चक्रभेद नामक तृतीय पटल में बता दिये गये हैं। इस तरह से षड्विध आधारों में वर्णों का विन्यास किया जाता है।।२०-२२।।

अब मूर्तिमन्त्र के न्यास का प्रकार बताया जा रहा है। नाद नामक हकार का न्यास आज्यधारिका पंक्ति के ऊपर के चार पदों में किया जाता है। आज्यधारिका में बिन्दु=प्रणव (ओङ्कार) का न्यास करके तब ऊर्ध्वपट्टिका से लेकर ऊर्ध्वकमल पर्यन्त मकार का न्यास किया जाता है। इसके बाद वृत्त नामक कण्ठस्थान में उकार का न्यास कर नीचे की कंजपट्टिका में अकार को रखा जाता है। इस तरह से सूक्ष्म पंचाक्षरों का न्यास सम्पन्न होता है।।२२-

नकारादियकारान्तं पञ्चार्णं तत्र विन्यसेत् ।
पञ्चाक्षरमिदं प्रोक्तं षडक्षरमथोच्यते ।।२५।।

तारं लिङ्गे प्रविन्यस्य पट्टिकायां नकारकम् ।
मकारमूर्ध्वकञ्जे तु शिकारं वृत्तमध्यके ।।२६।।

अधःकञ्जे च वाकारमधःपट्यां यकारकम् ।
एवं षडक्षरं प्रोक्तं षडध्वन्यास उच्यते ।।२७।।

षडध्वन्यासक्रमः

जगत्यां भुवनाध्वानं पदाध्वानं च पङ्कजे ।
वर्णाध्वानं च वृत्ते तु कलाध्वानं च पङ्कजे ।।२८।।

तत्त्वाध्वानं पट्टिकायां मन्त्राध्वानं प्रधारिके ।
एवं षडध्वकं न्यस्य सर्वमन्त्रात्मकं शिवम् ।।२९।।

सप्तकोटिमहामन्त्रैर्मन्त्रितं लिङ्गमुच्यते ।
ज्ञात्वा समर्चयेन्मन्त्री अन्यथा निष्फलं भवेत् ।।३०।।

कामिकादिषु तन्त्रेषु अष्टाविंशतिभेदतः ।
प्रोक्तानि मन्त्रजातानि तत्सर्वं विन्यसेद् बुधः ।।३१।।

२५॥

अब स्थूल पंचाक्षरों के न्यास का प्रकार बताया जा रहा है। नकार से लेकर यकार पर्यन्त पंचाक्षरों का यहाँ न्यास करने पर **नमः शिवाय** यह पंचाक्षर मन्त्र बनता है। पंचाक्षर मन्त्र के उद्धार की यह प्रक्रिया है। अब षडक्षर मन्त्र का उद्धार बताया जा रहा है। तार, अर्थात् प्रणव-स्वरूप ॐकार का शिवलिंग में न्यास कर के ऊर्ध्वपट्टिका में नकार का न्यास करे। ऊर्ध्व कमल में मकार को, वृत्त के मध्य में शिकार को, अधःकमल में वाकार को और अधःपट्टिका में यकार को रखने पर **ॐ नमः शिवाय** इस षडक्षर मन्त्र का स्वरूप बनता है॥२५-२७॥

अब षडध्वन्यास का प्रकार बताया जा रहा है। आधारपंकज में भुवनाध्वा का, अधःपंकज में पदाध्वा का, वृत्त (कण्ठ) स्थान में वर्णाध्वा का, ऊर्ध्वपंकज में कलाध्वा का, ऊर्ध्वपट्टिका में तत्त्वाध्वा का और आज्यप्रधारिका में मन्त्राध्वा का न्यास करना चाहिये। इस तरह से इन सभी मन्त्रों का न्यास करने से शिवलिंग की सर्वमन्त्रात्मकता स्थापित हो जाती है। यह शिवलिंग सात करोड़ महामन्त्रों से अभिमन्त्रित माना जाता है। शिवलिंग के इस स्वरूप को जान लेने के उपरान्त ही आराधक को इसकी पूजा करनी चाहिये। अन्यथा पूजा निष्फल हो जाती है। कामिक आदि तन्त्रों के रूप में २८ भेद वाले सिद्धान्तशास्त्र

तस्मात् सर्वप्रयत्नेन मन्त्रजातमिदं मतम् ।

मन्त्रभेदाः

अतिबालं सबालं च कौमारं च त्रिकोणकम् ।।३२।।
यौवनं चैव जातीनां प्रकृतिर्विकृतिस्तथा ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रजातिरनन्तरम् ।।३३।।
स्त्रीपुंनपुंसकं चैव चलनस्थानमासनम् ।
शुद्धं मिश्रं तु संकीर्णं मन्त्ररूपमथ शृणु ।।३४।।

तेषां लक्षणानि

शुद्धं चाकारसंयुक्तमतिबालं प्रकीर्तितम् ।
अष्टबीजसमायुक्तं सबालमिति कीर्तितम् ।।३५।।
पञ्चाक्षरसमायुक्तं कौमारं तु प्रकीर्तितम् ।
यौवनं चैव सर्वेषां मन्त्रजातं प्रकीर्तितम् ।।३६।।
शिवाक्षरं ब्राह्मणानां पञ्चाक्षरं नृपस्य च ।
षडक्षरसमायुक्तं वैश्यशूद्रं प्रकीर्तितम् ।।३७।।

में जिन मन्त्रों का स्वरूप बताया गया है, उन सबको जानकर बुद्धिमान् साधक को चाहिये कि उन सबका विन्यास इस शिवलिंग में करे। इसीलिये इस शिवलिंग को मन्त्रजात कहा जाता है, अर्थात् इसमें सभी मन्त्रों का निवास है और समस्त मन्त्रों का उद्धार भी इसीकी सहायता से किया जाता है।।२७-३२।।

अतिबाल, सबाल, कौमार, त्रिकोण, यौवन, जाति, प्रकृति, विकृति, ब्राह्मण, क्षत्रिय, वैश्य, शूद्र, स्त्री, पुरुष, नपुंसक, चलन, स्थान, आसन, शुद्ध, मिश्र और संकीर्ण — ये सब विभिन्न मन्त्रों के नाम हैं। इनके स्वरूप का वर्णन आगे किया जा रहा है।।३२-३४।।

अकार से संयुक्त शुद्धप्रासाद मन्त्र को **अतिबाल** कहा जाता है। आठ बीजों से संयुक्त मन्त्र को **सबाल** कहते हैं। पाँच अक्षरों वाला मन्त्र **कौमार** कहलाता है। सभी देवताओं के मन्त्र **यौवन** नाम से जाने जाते हैं। एक अक्षर वाला मन्त्र **ब्राह्मणों** का, पाँच अक्षर वाला **क्षत्रियों** का और छः अक्षर का मन्त्र **वैश्यों** और **शूद्रों** का माना गया है। इस तरह से यहाँ ये चारों जातियों के मन्त्र बताये गये हैं। स्वाहान्त मन्त्र **स्त्रीलिंग**, नमोऽन्त **पुलिंग** और फट्कार एवं वषट्कार से संयुक्त मन्त्र **नपुंसक** माने गये हैं। स्वाहान्त मन्त्र ब्राह्मण, क्षत्रिय और वैश्य वर्ण का तथा नमोऽन्त मन्त्र शूद्र वर्ण का माना गया है। इस मन्त्र-समूह की इन्द्र आदि लोकों में **स्थिति** (स्थान) और **आसन** माने गये हैं। एकाक्षर मन्त्र को **शुद्ध**, चार अक्षर वाले मन्त्र को **मिश्र** और नाना वर्णों से संयुक्त मन्त्र को **संकीर्ण** कहा जाता

एवं क्रमेण निर्णीतं चतुर्थ्यन्तं प्रकीर्तितम् ।
स्वाहाकारो भवेन्नारी नमोऽन्तं पुरुषाकृतिः ।।३८।।
फट्कारं च वषट्कारं नपुंसकमिति स्मृतम् ।
विप्रं स्वाहान्तकं प्रोक्तं नृपवैश्यादिसंयुतम् ।।३९।।
इन्द्रादिशयनस्थानं मन्त्रजातं प्रकीर्तितम् ।
शुद्धमेकाक्षरं प्रोक्तं वेदाक्षरं तु मिश्रकम् ।।४०।।
संकीर्णो बहुवर्णश्च त्रिविधो मन्त्र ईरितः ।

मन्त्रशरीरवर्णनम्

मन्त्रादौ शीर्षकं प्रोक्तं मन्त्रोर्ध्वे वदनं मतम् ।।४१।।
मन्त्रपार्श्वे तु बाहू च तस्याप्यधरसंयुतम् ।
पार्श्वे तु चक्षुः श्रोत्रं च चक्षुर्मध्ये च नासिका ।।४२।।
तस्या ऊर्ध्वे ललाटं च बिन्दुर्मस्तकमुच्यते ।
नादो जिह्वा समाख्यातः शब्दः शब्द इति स्मृतः ।।४३।।
ओष्ठः शब्देन भिन्नः स्यादास्यान्तरसमन्वितः ।
वाग्भवं मन्त्रमित्याहुरोष्ठान्तं कण्ठ एव च ।।४४।।
पौरुषं रूपमेवं हि वासवाहनमुच्यते ।
प्रणवान्तसमायुक्तं मन्त्रान्ते च प्रतिष्ठितम् ।।४५।।
मन्त्ररूपमिदं प्रोक्तं मन्त्रवासस्तथोच्यते ।

मन्त्रवासनिरूपणम्

मन्त्राणां प्रकृतिर्वासो वाहनं विकृतिस्तथा ।।४६।।

है। मन्त्रों के इस रूप में भी तीन भेद हो जाते हैं।।३५-४१।।

मन्त्र का आदि भाग शिर, ऊर्ध्व भाग वदन और दोनों पार्श्व भाग बाहू कहलाते हैं। अधर की भी यहीं स्थिति मानी गई है। मन्त्र के दोनों पार्श्वों में चक्षु और श्रोत्र एवं इन चारों के बीच में नासिका स्थित है। नासिका के ऊपर ललाट और उसके ऊपर मस्तक की स्थिति मानी गई है। मन्त्र में स्थित नाद ही जिह्वा है। जिह्वा से उच्चरित वर्णात्मक ध्वनि ही शब्द है। यह शब्द मुँह में स्थित सामान्य शब्द से भिन्न माना गया है। वाग्भव को मन्त्र का मुख माना गया है। मन्त्र का यह आकार मानव-शरीर की तुलना करता है। अब मन्त्र के वास-स्थान और वाहन का स्वरूप बताया जा रहा है।।४१-४५।।

मन्त्र के आदि में स्थित प्रणव से लेकर मन्त्र के अन्त में संयोजित नमः, स्वाहा आदि तक का भाग मन्त्र का स्वरूप माना गया है। मन्त्रगत प्रकृतिसंज्ञक वर्ण मन्त्रों के वासस्थान और विकृतिसंज्ञक वर्ण मन्त्रों के वाहन माने गये हैं। मन्त्रों की वासस्थान- रूप प्रकृति ही

प्रकृतिर्वर्णभावश्च वर्णानां वासजिह्वया ।
आस्ये च जिह्वावासश्च आस्यानां बुद्धिवासनम् ।।४७।।
बुद्ध्यर्णं हृदये वासं हृदयं पिण्डवासनम् ।
पिण्डार्णवासो नाड्यां तु नाडीनां वायुवासनम् ।।४८।।
वायुवासश्च शक्तीनां शक्तिवासश्च वै शिवः ।
शिववासश्च सर्वेषां मन्त्रवासः प्रकीर्तितः ।।४९।।
मन्त्रवासो मया प्रोक्तो मन्त्रवाहनमुच्यते ।

मन्त्रवाहननिरूपणम्

लिङ्गे च प्रतिमाकुम्भे वास्तौ वह्नौ च मूलके ।।५०।।
अन्यकुम्भे च वास्ये च युक्तं मन्त्रस्य वाहनम् ।
एवं नवदशं प्रोक्तं मन्त्रजातस्य लक्षणम् ।।५१।।
मन्त्रजातमिदं प्रोक्तं मन्त्रकीलमथ शृणु ।

।। इति श्रीवातुले शुद्धाख्यतन्त्रे मन्त्रजातं नाम
नवमः पटलः समाप्तः ।।९।।

वर्ण कहलाती है और जिह्वा में इनका निवास होने से जिह्वा को ही मन्त्रों का वासस्थान माना गया है। यह जिह्वा मुख में स्थित है। इसका संचालन बुद्धि से होता है और शब्द से अनुविद्ध बुद्धि का संचालन हृदय से होता है। इसी तरह से बुद्धि के संचालक हृदय का वासस्थान पिण्डाक्षर माना गया है। इन पिण्डाक्षरों का संचालन नाडी से और नाडी का संचालन वायु से होता है। वायु का संचालन शक्ति से होता है और शक्ति के संचालक भगवान् शिव हैं। इस प्रकार अन्ततः समस्त मन्त्रों के वासस्थान के रूप में भगवान् शिव ही मान्य हैं, यह विषय यहाँ बताया गया है।।४५-४९।।

इस प्रकार से मन्त्रों के वासस्थान का निरूपण यहाँ किया गया है। अब मन्त्रों के वाहनों के विषय में बताया जा रहा है। लिंग, प्रतिमा, कुंभ, वास्तु, वह्नि, मूलस्थान, दीक्षाकाल में स्थापित कुंभ तथा अन्य वासयोग्य वस्तु — ये सब मन्त्र के वाहन माने गये हैं।।५०-५१।।

इस तरह से इस मन्त्रजात पटल में १९ प्रकार के मन्त्रों के स्वरूप का विवरण दिया गया है। अब आगे मन्त्रकील नामक पटल को सुनाया जा रहा है। हे षणमुख ! उसे तुम सावधानी से सुनो।।५१-५२।।

।। इस तरह से श्री वातुलशुद्धाख्य तन्त्र का यह मन्त्रजात नामक
नवम पटल पूरा हुआ ।।९।।

❋ ❋ ❋

दशमः पटलः

कीलमन्त्रविसर्जनम्

अथातः संप्रवक्ष्यामि मन्त्रकीलमथ शृणु ।
अकीलं कीलमित्युक्तं कीलमन्त्रं विसर्जयेत् ।।१।।
नेत्रे ललाटं वक्षश्च श्रोत्रे चास्यं च नासिके ।
पादौ बाहू च देहश्च मन्त्र उच्चार्यते बुधैः ।।२।।
अतिदीर्घायते वृत्तमथ दीर्घं च वृत्तकम् ।
अर्धचन्द्रसमाकारं नाद आयान्तनादवत् ।।३।।

भक्तिस्थानानि

गुरौ लिङ्गेऽक्षमालायां मन्त्रे भस्मनि पञ्चसु ।
एतासु शिवमुद्रासु शिववद् भक्तिमाचरेत् ।।४।।
आत्मीयान् विविधान् भोगान् स्त्रीपुत्रप्रमुखानपि ।
स्वात्मानं चित्तबुद्धी च तेषां च वशमानयेत् ।।५।।

अब मैं मन्त्रकील प्रकरण को कहूँगा, उसे तुम सावधानी से सुनो। अकील और कील के भेद से मन्त्र दो प्रकार के होते हैं। इनमें से कीलित मन्त्र का परित्याग कर देना चाहिये। इसका भाव यह भी है कि यदि ऐसे मन्त्रों का ग्रहण आवश्यक हो, तो तन्त्रशास्त्र में बताई विधि से उसका उत्कीलन करना चाहिये।।१।।

यह नेत्र-मन्त्र है, यह ललाट-मन्त्र है, यह वक्ष का मन्त्र है, यह श्रोत्र-मन्त्र है, यह आस्य-मन्त्र है, यह नासिका-मन्त्र है, यह पाद-मन्त्र है, यह हस्त-मन्त्र है, यह देह- मन्त्र है, इन सब विभागों को भलीभाँति जान लेने के उपरान्त ही बुद्धिमान् साधक मन्त्रों का उच्चारण करता है। मन्त्र-वृत्त दीर्घ से दीर्घतर होता रहता है। मन्त्र की इस दीर्घ आय को घुमाकर अर्धचन्द्र का आकार दिया जाता है। मन्त्र से निकलने वाली ध्वनि के समान मन्त्रनाद साक्षात् नादस्वरूप रहता है।।२-३।।

गुरु के प्रति, लिंग, अक्षमाला, मन्त्र और भस्म के प्रति भगवान् शिव के समान ही भक्ति प्रदर्शित करनी चाहिये, क्योंकि इन पाँचों शिवमुद्राओं को शिवस्वरूप ही माना जाता है। अपने विविध भोगों को, अधिक क्या, स्त्री-पुत्र जैसे स्वजनों और स्वयं अपने आप को भी, अपने मन और बुद्धि को भी उन सबके वश में कर देना चाहिये। जो व्यक्ति

यो भेदं भक्तिमान् भक्तस्तेषु मोहात् करोति च ।
शिवद्रोहीति विज्ञेयः सर्वकर्मबहिष्कृतः ।।६।।

शैवभेदाः

शैवं चतुर्विधं ज्ञेयं समासाच्छृणु षण्मुख ।
सामान्यं मिश्रकं चैव शुद्धं वीरं यथाक्रमम् ।।७।।
तत्रादौ संप्रवक्ष्यामि शैवसामान्यलक्षणम् ।

१. सामान्यशैवलक्षणम्

शिवलिङ्गं यदा पश्येत् तदा कुर्यात् समर्चनम् ।।८।।
प्रदक्षिणं वा प्रणतिं दर्शनं वात्र कारयेत् ।
भस्मधारणमात्रेण शुद्धो भवति सर्वदा ।।९।।
शिवकीर्तौ तदालापे प्रीतिमान् शिवभक्तके ।
एतेषां नियतिर्नास्ति यथालब्धं समाचरेत् ।।१०।।
सामान्यलक्षणं प्रोक्तं वक्ष्ये मिश्रस्य लक्षणम् ।

२. मिश्रशैवलक्षणम्

शैवं च वैष्णवं शाक्तं कौमारं गाणपत्यकम् ।।११।।

मोहवश इन सबको भगवान् शिव से भिन्न मानता है, वह शिवद्रोही माना जाता है, उसे शिवपूजन आदि सभी कार्यों से बहिष्कृत कर देना चाहिये।।४-६।।

शैवों के चार भेद माने गये हैं। हे षण्मुख ! इनके विषय में संक्षेप में तुम्हें जानकारी दे रहा हूँ। सामान्य, मिश्र, शुद्ध और वीर — ये इनके नाम हैं। इनमें से सबसे पहले सामान्य शैव का लक्षण तुम्हें बता रहा हूँ। सामान्यशैव जब भी शिवलिंग को देखता है, उसकी पूजा करता है, प्रदक्षिणा करता है, प्रणाम करता है अथवा आदरभाव प्रकट करता है। यह सामान्यशैव भस्म धारण कर लेने मात्र से शुद्ध हो जाता है। वह शिव की महिमा को गाने में और शिवभक्तों के साथ मिलकर प्रेमपूर्वक शिवकथाओं के कहने में सदा लगा रहता है। ऐसे शिवभक्तों का कोई निश्चित कार्यक्रम निर्धारित नहीं रहता। ये यथावसर शिवपूजन आदि में लगे रहते हैं।।७-१०।।

सामान्यशैव का लक्षण बताने के बाद अब मैं मिश्रशैव का लक्षण बता रहा हूँ। मिश्रशैव शिव, विष्णु, शक्ति, स्कन्द, गणपति, सूर्य आदि सभी देवताओं की उन-उन सम्प्रदायों में प्रदर्शित विधि से आराधना करते हैं। इस सभी देवताओं के मन्त्रों का यहाँ शिवपूजा के

सौरं चाखिलदैवत्यं पूजनं च समाचरेत्।
एतेषूक्तेषु सर्वेषु तत्तन्मन्त्रेषु मिश्रितान् ॥१२॥
समभक्तिसमायुक्तः सर्वान् लिङ्गेन भावयेत्।
मिश्रशैवमिति प्रोक्तं शुद्धशैवमथ शृणु ॥१३॥

३. शुद्धशैवलक्षणम्

शुद्धत्वं शिवमुद्दिष्टं शिवाज्जातं तु शैवकम्।
शुद्धशैवसमायोगाच्छुद्धशैवमिति स्मृतम् ॥१४॥
शिवेनोत्पद्यते शैवस्तस्माज्जातः शिवद्विजः।
कामिकादिषु शास्त्रेषु अष्टाविंशतिषु क्रमात् ॥१५॥
वेदशास्त्रादिविद्यासु कृताभ्यासः शिवव्रती।
कर्षणादिप्रतिष्ठान्तं प्रतिष्ठाद्युत्सवान्तकम् ॥१६॥
उत्सवात् प्रायश्चित्तान्तं ज्ञात्वा सर्वं समाचरेत्।
मन्त्रयन्त्रक्रियामुद्रान्यासावाहनकादिभिः ॥१७॥
उपचारैर्बहुविधैर्लिङ्गं सिंहासने यजेत्।

द्विविधा पूजा

आत्मार्थं च परार्थं च पूजाद्विविधमुच्यते ॥१८॥

बाद स्मार्त पंचायतन पद्धति से उपयोग होने से यह शिवभक्त सबके प्रति समान भक्ति रखता हुआ सबमें शिवलिंग की ही भावना करता है। यही मिश्रशैव का स्वरूप है। अब मैं शुद्धशैव का लक्षण बता रहा हूँ, उसे सुनो॥११-१३॥

मनुष्य की शुद्ध भावना ही शिव कहलाती है। इस शुद्ध शिवभाव से सम्पन्न व्यक्ति शैव कहलाता है। इस प्रकार की शुद्धता और शिवता से सम्पन्न साधक शुद्धशैव माना गया है। यह शुद्धशैव शिव के उपदेशों का अनुसरण करता है। इसी मत में शिवद्विजों की उत्पत्ति मानी गई है। ये शिवद्विज कामिक आदि अट्ठाईस सिद्धान्तागमों के साथ वेदशास्त्र आदि विद्याओं का भी अभ्यास करते हैं और शिवपूजा में सदा लगे रहते हैं। शैवागमोक्त विधि से भूमि-कर्षण से लेकर देव-प्रतिष्ठा पर्यन्त, प्रतिष्ठा से लेकर उत्सव पर्यन्त और उत्सव से लेकर प्रायश्चित्त पर्यन्त समस्त विधि-विधान को जानकर इनका अनुष्ठान करते हैं। मन्त्र, यन्त्र, मुद्रा, न्यास आवाहन आदि क्रियाओं के सहारे नाना प्रकार के उपचारों की सहायता से सिंहासन पर स्थापित शिवलिंग का पूजन करते हैं।

आत्मार्थ और परार्थ के भेद से यह शिवपूजा दो प्रकार की होती है। गुरु के द्वारा प्रदत्त लिंग में, स्थण्डिल पर स्थापित शिवलिंग में अथवा अपने भीतर हृदय में स्थापित

दत्ते च गुरुणा लिङ्गे स्थण्डिले स्वयमात्मनि ।
आत्मार्थमिदमाख्यातं परार्थं तु ततः शृणु ।।१९।।

ग्रामादौ स्थापिते लिङ्गे यद्वा देवादिनिर्मिते ।
परार्थमिति विज्ञेयं सर्वप्राणिहितावहम् ।।२०।।

शिवद्विजेन कर्तव्या द्विधा पूजेति चोदिता ।
अन्येषां स्वार्थयजनं न कुर्यात्तु परार्थकम् ।।२१।।

मोहाल्लोभाच्च कुर्वीत राज्ञो राष्ट्रस्य दुःस्थितिः ।
शिवावरणदेवांश्च नित्यं संपूजयेद् गुह ।।२२।।

पृथक्स्थानस्थिताः सर्वा नार्चयेदन्यदेवताः ।
मन्त्रपिण्डहृदम्भोजे वासमन्त्रस्य भावतः ।।२३।।

आवाहनात् समायुक्ते लिङ्गे पूजादिकं चरेत् ।
मन्त्रलिङ्गशरीरः स्यात् स एव परमः शिवः ।।२४।।

शुद्धशैवमिति प्रोक्तं वीरशैवं ततः शृणु ।

४. वीरशैवलक्षणम्

ज्ञानगम्यं रहस्यं च कैवल्यपदकारणम् ।।२५।।

शिवलिंग में की जानेवाली पूजा आत्मार्थ कहलाती है। अब परार्थ पूजा का स्वरूप सुनो। ग्राम आदि में स्थापित लिंग में अथवा देवता आदि के द्वारा स्थापित लिंग में की गई पूजा परार्थ कहलाती है। यह पूजा समस्त प्राणियों के कल्याण के लिये की जाती है। इन दोनों तरह की पूजाओं का अनुष्ठान शिवद्विज करता है। सामान्य जन को आत्मार्थ यजन ही करना चाहिये, वह परार्थ यजन न करें। मोह अथवा लोभवश ऐसा व्यक्ति यदि परार्थ यजन करता है, तो इसके कारण राज्य और राष्ट्र का अहित होता है। हे स्कन्द ! शिवद्विज को शिव के साथ शिव के परिवार के रूप में ब्रह्मा, विष्णु आदि सभी आवरण देवताओं का भी प्रतिदिन पूजन भलीभाँति करना चाहिये। आवरण देवताओं से भिन्न अन्यत्र स्थापित देवताओं का पूजन यहाँ नहीं किया जाता। अपने हृदय-कमल को सभी शिवमन्त्रों का निवास स्थान मानकर इस अन्तर्लिंग में भावना के सहारे आवाहन आदि समस्त क्रियाकलाप को सम्पन्न करते हुए मानसपूज़ा करनी चाहिये। इस तरह के अनुष्ठान से साधक का समस्त शरीर मन्त्रमय और लिंगमय हो जाता है, वह साक्षात् परमशिव बन जाता है। शुद्धशैव का यही लक्षण है। अब वीरशैव के लक्षण को सुनो॥१४-२५॥

वीरशैव के स्वरूप का बोध केवल स्वानुभूति से ही हो सकता है। यह सर्वथा गोपनीय

वीरशैवमिति ज्ञेयमेतल्लक्षणमुच्यते।
एक एवायमेतस्मिन् सर्वस्मिन् जगतीति यः।।२६।।

विशिष्ट ईर्यते यस्माद् वीर इत्यभिधीयते।
शिवेन सह संबन्धं शैवमित्यादृतं बुधैः।।२७।।

उभयोः सम्पुटीभावाद् वीरशैवमिति स्मृतम्।
शिवार्थार्पितजीवत्वाद् वीरतन्त्रसमुद्भवात्।।२८।।

वीरशैवसमायोगाद् वीरशैवमिति स्मृतम्।
वीरमाहेश्वरं तन्त्रं ज्ञातव्यं त्रिविधं सुत।।२९।।

सामान्यं च विशेषं च निराभारं क्रमाद् भवेत्।
तत्रादौ संप्रवक्ष्यामि वीरसामान्यलक्षणम्।।३०।।

१. सामान्यवीरशैवः

हस्तमस्तकसंयोगाद् भूतिपट्टस्य धारणात्।
शिवदेहीति विज्ञेयः सर्वपाशैः प्रमुच्यते।।३१।।

गुरुणा दत्तलिङ्गं तु शिवमन्त्रेण धारयेत्।
मूर्ध्नि कण्ठे भुजे हस्ते हृत्स्थले नाभिमण्डले।।३२।।

है और कैवल्यपदवी को प्राप्त कराने वाला है। इस वीरशैव के लक्षण को ही अब बताया जा रहा है। इस समस्त जगत् में समस्त विशिष्ट गुणों से सम्पन्न एकमात्र व्यक्ति ही वीर कहलाता है। यतः इस विशिष्ट वीर का शिव के साथ सदा संबन्ध रहता है, अतः विद्वद्गण इसे शैव कहते हैं। इन दोनों शब्दों के मिलन से **वीरशैव** शब्द बनता है। यह वीरशैव शिव के प्रति अपने सारे जीवन को समर्पित कर देता है, वीरागमों के आधार पर ही इनके दीक्षा आदि सारे संस्कार संपन्न होते हैं और ऊपर बताई गई व्युत्पत्ति के अनुसार वीरशैव शब्द का प्रयोग इसके लिये सार्थक है, इसलिये भी यह साधक वीरशैव कहलाता है। हे पुत्र ! यह वीरमाहेश्वर तन्त्र त्रिविध माना गया है। इनके नाम सामान्य, विशेष और निराभार हैं। अब मैं क्रमशः इनके स्वरूप को बता रहा हूँ।।२५-३०।।

इनमें सामान्य वीरशैव का लक्षण इस प्रकार है — दीक्षा के समय वीरशैवाचार्य गुरु जब अनुग्रहपूर्वक अपने प्रिय परीक्षित शिष्य के मस्तक पर अपना शिवहस्त रखता है, उसके ललाट पर भस्म लगाता है और उसके कन्धों पर दुपट्टा डालता है, तो इस तरह से दीक्षित व्यक्ति ही वीरशैवों की सामान्य दीक्षा से संपन्न माना जाता है। शिवदेही के रूप में इसे मान्यता मिलती है। ऐसा व्यक्ति सभी पापों से मुक्त हो जाता है। वह शिवदेही शिष्य

एतेषामेकदेशे तु धारयेच्छिवलिङ्गकम् ।
एककालं द्विकालं वा त्रिकालं वा समर्चयेत् ।।३३।।

गुरौ लिङ्गे सदा भक्तिं कारयेद् भसिते व्रती ।
वीरसामान्यमाख्यातं विशेषं च ततः शृणु ।।३४।।

२. विशेषवीरशैवः

शिवकुम्भं समासाद्य स्थण्डिलादिषु पूर्ववत् ।
शिवकुम्भे शिवं पूज्य भक्तानन्नेन तोषयेत् ।।३५।।

शेषं दीक्षोक्तवत् कृत्वा मलपाशादिमोचनम् ।
गुरुः शिष्यं समालोक्य तत्त्वदेहं विचिन्तयेत् ।।३६।।

शिवकुम्भस्थतोयेन अभिषिञ्चेत् शिवाणुना ।
नादं बिन्दुं कलां चैव तत्तत्स्थानेषु विन्यसेत् ।।३७।।

षट्चक्रं च षडङ्गं च षडध्वानं षडानन ।
तत्तत्स्थानेषु विन्यस्य पञ्चब्रह्म न्यसेत् ततः ।।३८।।

गुरु के द्वारा समर्पित शिवलिंग को श्रीमत्पंचाक्षरी मन्त्र के साथ अपने बाह्य और आन्तर देह में धारण करे। मस्तक, कण्ठ, भुजा, हाथ, नाभिस्थान — इनमें से किसी एक स्थान पर उस गुरुप्रदत्त शिवलिंग को धारण करे। प्रातःकाल, प्रातःकाल के साथ सायंकाल अथवा मध्याह्नकाल को भी मिलाकर सन्ध्यावन्दन के समान तीनों कालों में इस शिवलिंग की पूजा करनी चाहिये। गुरु और शिवलिंग के प्रति सदा भस्म- धारण का व्रत रखने वाला साधक भक्तिभावना से परिपूर्ण रहे। यह सामान्य वीरशैव का स्वरूप है। अब विशेष वीरशैव का लक्षण सुनो।।३०-३४।।

वीरशैव दीक्षा को संपन्न करने में समर्थ देशिकोत्तम शुद्धशैव दीक्षा के समय स्थण्डिल आदि शुद्धप्रदेश में स्थापित शिवकलश के पास आकर पहले उस शिवकलश में भगवान् शिव की पूजा करे। बाद में इस पूजा के अवसर पर उपस्थित शिवभक्तों को भोजन करावे। समस्त मलीय पाशों का छेदन करने वाले, दीक्षा के समय किये जाने वाले अन्य समस्त अनुष्ठानों को पूरा करके गुरु शिष्य पर कृपादृष्टि डालकर उसका समस्त देह शिवतत्त्वमय हो जाय, ऐसी भावना करे। शिव-पंचाक्षरी मन्त्र का उच्चारण करते हुए शिवकुंभ में स्थित पवित्र जल से शिष्य के मस्तक पर दूर्वादल की सहायता से जल छिड़के। नाद रूपी शिव, बिन्दुरूपा शक्ति और कलास्वरूप शिवावयवों की शलाका-पीठ के उन उन स्थानों पर स्थापना करे। हे षडानन स्कन्द ! मूलाधार आदि षड्विध चक्रों, सर्वज्ञता आदि षड्विध शिवांगों और भुवनाध्वा आदि षड्विध अध्वाओं का तत्तत् स्थानों पर विन्यास कर सद्योजात आदि

मूलमन्त्रं तूपदिशेत् ततो लिङ्गं प्रदापयेत्।
शेषाणि सर्वकर्माणि दीक्षाध्वोक्तक्रमाच्चरेत्।।३९।।

देहे प्राणं समायोज्य प्राणं लिङ्गे प्रकल्पयेत्।
अविनाभावसंयोगात् तस्मादैक्यं प्रकल्पयेत्।।४०।।

अन्यदृष्टिनिपातं यत् तद् द्रव्यं परिवर्जयेत्।
शुद्धद्रव्यं समासाद्य लिङ्गानां च समर्पणम्।।४१।।

इति व्रतसमायुक्तो वीरशैवो विशिष्यते।
विशेषशैवमाख्यातं निराभारं ततः शृणु।।४२।।

३. निराभारवीरशैवः

सर्वसंसारसौख्यानि त्यक्त्वा चित्तं शिवेऽर्पयेत्।
दण्डकौपीनकाषायजटावल्कलधारकः।।४३।।

मुण्डी वा शिवचिह्नानि धारयेदजिनादिकम्।
भिक्षाशी नियताहारः सुखसंसारवर्जितः।।४४।।

निराभारीति विज्ञेयः स एव परमः शिवः।
वीरमाहेश्वराणां च सामान्यव्रतमुच्यते।।४५।।

पंचब्रह्म मन्त्रों की भी स्थापना करे। इस तरह से दीक्षोक्त समस्त विधिविधानों के संपन्न हो जाने के उपरान्त आचार्य शिष्य को पंचाक्षरी मन्त्र का उपदेश करे और उसे प्राणलिंग प्रदान करे। आगे के समस्त क्रियाकलापों को भी दीक्षापटल में प्रदर्शित विधि से संपन्न करे। शिष्य के देह में इस प्राणलिंग की प्रतिष्ठा कर उसके प्राण में भी लिंगतत्त्व की भावना करे। इस तरह से यहाँ प्राण और लिंग में अविनाभाव संबन्ध से ऐक्यभावना की जाती है। मार्जार, शुनक आदि के द्वारा दृष्ट अपवित्र द्रव्यों का परिहार कर शुद्ध द्रव्यों का उपहार शिव को अर्पित किया जाता है। इस तरह के शास्त्रोक्त व्रतों का पालन करने वाला साधक विशेष वीरशैव कहलाता है। शास्त्रों में यह विशेष वीरशैव का स्वरूप बताया गया है। अब तुम निराभार वीरशैव का लक्षण सुनो।।३५-४२।।

निराभार वीरशैव सभी प्रकार के सांसारिक सुखों का परित्याग कर अपने चित्त को शिवार्पित कर दे। दण्ड, कौपीन, काषाय वस्त्र, जटा और वल्कल धारण कर अथवा मुण्डितमस्तक होकर भस्म, रुद्राक्ष आदि शिवचिह्नों को धारण करे। आसन के रूप में मृगचर्म, व्याघ्रचर्म आदि का ग्रहण करे। भिक्षा से अर्जित अन्न ग्रहण करे, भोजन के समस्त नियमों का पालन करते हुए नियत आहार ग्रहण करे। सभी सांसारिक सुखों का परित्याग कर दे। ऐसा निराभारी वीरशैव साक्षात् परमशिव ही हो जाता है।।४३-४५।।

सामान्यव्रतनिरूपणम्

पूर्वोक्तशिवमुद्रासु तद्धारिषु च सर्वतः ।
अर्थतः प्राणतः प्राज्ञो भक्तिं कुर्याद् दृढां सुत ।।४६।।

पापं तेषु न वक्तव्यं स्वयमेव कदाचन ।
कृते परेण चेत् पापे नोपेक्षेत् करणैस्त्रिभिः ।।४७।।

बलवान् रक्षयेत् तत्र दुर्बलश्चेद् व्रजेत् ततः ।
करणैस्तु विहीनश्चेद् बुद्धिं तत्र न निक्षिपेत् ।।४८।।

स्वीकरोति यदा लिङ्गं गुरुणा दीक्षयाऽणुना ।
तदाप्रभृति लिङ्गैक्यमविनाभावयोगतः ।।४९।।

देहं प्राणेन संस्थाप्य प्राणं लिङ्गेन निक्षिपेत् ।
प्राणेन निक्षिपेल्लिङ्गं पृथग्भावं न कारयेत् ।।५०।।

वीरशैवक्रमः प्रोक्तः प्रायश्चित्तविवर्जितः ।

अब इन त्रिविध वीरमाहेश्वरों के द्वारा पालनीय सामान्य व्रतों का परिचय दिया जा रहा है। पूर्वोक्त सभी प्रकार की शिवमुद्राओं और उनको धारण करने वाले शिवभक्तों के प्रति धन और प्राण के माध्यम से भी बुद्धिमान् शिवाराधक को दृढ भक्ति प्रदर्शित करनी चाहिये। इसे शिवभक्तों के प्रति स्वयं कभी भी कटु वचनों का प्रयोग नहीं करना चाहिये। यदि अन्य कोई व्यक्ति भगवान् शिव या शिवभक्तों के प्रति इस तरह का बुरा व्यवहार करता है, तो उसकी मन, वचन और शरीर नामक तीनों करणों से कभी उपेक्षा नहीं करनी चाहिये। यदि वह शिवयोगी बलवान् है, तो उसे आततायियों से शिवभक्तों की रक्षा करनी चाहिये। यदि वह दुर्बल है, तो उसे उस स्थान को छोड़कर दूसरी जगह चले जाना चाहिये। यदि शिवभक्त तीनों करणों से कमजोर है, तो उसको उन दुष्कृत्यों से अपनी बुद्धि को हटा लेना चाहिये। दीक्षा के अवसर पर गुरु के द्वारा प्रदत्त शिवलिंग को और पंचाक्षरी मन्त्र को स्वीकार कर लेने वाले शिवभक्त को तभी से प्राण और लिंग की अविनाभाव संबन्ध से अपने भीतर लिंगैक्य के रूप में अभेद-भावना करनी चाहिये। वह शिवभक्त अपने देह की प्राण के रूप में और प्राण की लिंग के रूप में भावना करे। इस तरह से प्राण और लिंग की परस्पर अनुस्यूति की भावना करने से इनकी परस्पर की पार्थक्य-भावना समाप्त हो जाती है। प्रायश्चित्त की विधि को छोड़कर यहाँ इस प्रकार वीरशैव क्रम का परिचय दिया गया है।।४५-५१।।

ऐसा प्राणलिंगी वीरशैव ऊपर बताये गये व्रतों के पालन में विघ्न उपस्थित होने पर

प्रायश्चित्तनिरूपणम्

प्राणलिङ्गी व्रते लुप्ते हस्तखड्गादवञ्चयन् ।।५१।।

मुखं पङ्कजवच्छिन्द्याद् वीरभृत्यस्य लक्षणम् ।
यो वा चोत्पाटयेज्जिह्वां शिवनिन्दारतस्य तु ।।५२।।

त्रिसप्तकुलमुद्धृत्य रुद्रलोकं स गच्छति ।
शुद्धशैवो विशेषेण मन्त्रयन्त्रप्रचारणात् ।।५३।।

शुद्धो भवति लोपेषु प्रायश्चित्तविधानतः ।
स्वेष्टलिङ्गे परिभ्रष्टे नष्टे दग्धे हृतेऽपि वा ।।५४।।

नीते वा मूषिकाद्यैश्च काककौलेयवानरैः ।
जप्त्वा लक्षमघोरस्य विधिना लिङ्गकान्तरम् ।।५५।।

प्रतिष्ठाप्य नयेच्छुद्धिं पिण्डिकायां तथैव च ।
व्रतस्य च क्रियालोपे नियमस्य विलोपने ।।५६।।

गायत्र्यष्टशतेनैव विशुद्धिमधिगच्छति ।

निगमनम्

सामान्यं मिश्रकं चैव शुद्धं वीरं चतुर्विधम् ।।५७।।

अपने हाथ में खड्ग लेकर बिना हिचकिचाहट के अपने सिर को कमल के समान काट डाले। वीरशैव का यही मुख्य लक्षण है। जो वीरशैव शिव की निन्दा करने वाले की जिह्वा उखाड़ फैकता है, वह अपनी २१ पीढियों का उद्धार कर शिवलोक प्राप्त करता है। शुद्धशैव सदोष होने पर मन्त्रों और यन्त्रों की सहायता से और प्रायश्चित्तविधि का अनुसरण कर पुनः शुद्ध हो जाता है। अपने इष्टलिंग के अपवित्र हो जाने, नष्ट हो जाने, जल जाने या किसी के द्वारा उठा ले जाने पर अघोर मन्त्र का जप करने के उपरान्त पुनः दूसरे लिंग को पीठिका पर स्थापित कर विधिवत् धारण करना चाहिये। व्रत की क्रियाओं का या नियमों का लोप हो जाने पर १०८ वार गायत्री मन्त्र के जप से उसकी शुद्धि होती है।।५१-५७।।

इस तरह से हे षडानन ! तुमको मैंने सामान्य, मिश्र, शुद्ध और वीर नामक चतुर्विध शैवों से संबद्ध सभी बातें संक्षेप में बता दी हैं। इसके साथ ही तत्त्वभेद से लेकर मन्त्रकील पर्यन्त दस पटलों वाले इस शुद्धाख्य तन्त्र का हे शोभन व्रतवाले कुमार ! मैंने तुम्हें उपदेश किया है।।५७-५९।।

तत्सर्वं हि समासेन तव प्रोक्तं षडानन ।
तत्त्वादिकीलकान्तानां पटलानां दश क्रमात् ।।५८।।
भेदाः शुद्धाख्यतन्त्रस्य कथितास्तव सुव्रत ।

।। इति श्रीवातुले शुद्धाख्यतन्त्रे कीलं नाम
दशमः पटलः समाप्तः ।।१०।।

।। समाप्तश्चायं ग्रन्थः ।।

❋ ❋ ❋

।। इस तरह से श्री वातुलशुद्धाख्य तन्त्र का यह मन्त्रकील नामक
दशम पटल पूरा हुआ ।।१०।।

।। इसीके साथ यह ग्रन्थ भी समाप्त हुआ ।।

❋ ❋ ❋

श्लोकार्धानुक्रमणी

***

हमारे अन्य प्रकाशन

	सजिल्द	अजिल्द
१. लिङ्गधारणचन्द्रिका — नन्दिकेश्वर शिवाचार्य	रु.१५०	रु.१२५
२. ब्रह्मसूत्रश्रीकण्ठभाष्यम् — सम्पा. पं. व्रजवल्लभ द्विवेदी	रु.१५०	- -
३. वीरशैव अष्टावरण विज्ञान —डॉ. चन्द्रशेखर शिवाचार्य महास्वामीजी	- -	रु.५०
४. सिद्धान्तशिखामणिसमीक्षा — डॉ. चन्द्रशेखर शिवाचार्य महास्वामीजी	रु.२००	- -
५. निगमागम संस्कृति — पं. व्रजवल्लभ द्विवेदी	रु.२००	रु.१५०
६. सूक्ष्मागमः — सम्पा. पं. व्रजवल्लभ द्विवेदी	रु.१५०	रु.१२५
७. चन्द्रज्ञानागमः — सम्पा. पं. व्रजवल्लभ द्विवेदी	रु.२००	रु.१७५
८. मकुटागमः — सम्पा. पं. व्रजवल्लभ द्विवेदी	रु.१२५	रु.१००
९. कारणागमः — सम्पा. पं. रामचन्द्र पाण्डेय	रु.१७५	रु.१५०
१०. निगमागमीयसंस्कृतिदर्शनम् — पं. व्रजवल्लभ द्विवेदी	रु.३००	रु.२००
११. पारमेश्वरागमः — सम्पा. पं. व्रजवल्लभ द्विवेदी	रु.३५०	रु.२००

१२.	**Candrajñānāgam**		
	—Tr. by Dr. Rama Ghose	Rs.300	- -
१३.	**ईशावास्योपनिषद्**		
	— सम्पा. पं. जगन्नाथ शास्त्री तैलङ्ग	रु.१५०	रु.१००
१४.	**केनोपनिषद्**		
	— सम्पा. पं. जगन्नाथ शास्त्री तैलङ्ग	रु.२००	रु.१५०
१५.	**सिद्धान्तप्रकाशिका**		
	— सम्पा. पं. व्रजवल्लभ द्विवेदी	रु.१००	रु.७५
१६.	**Makuṭāgama**		
	—Tr. by Dr. Rama Ghose	Rs.175	Rs.150
१७.	**शक्तिविशिष्टाद्वैततत्त्वत्रयविमर्शः**		
	— डॉ. चन्द्रशेखर शिवाचार्य महास्वामीजी	रु.३००	रु.२००
१८.	**अनुभवसूत्रम्**		
	— सम्पा. पं. गजानन शास्त्री मुसलगाँवकर	रु.२००	रु.१२५
१९.	**सिद्धान्तशिखोपनिषद्**		
	— सम्पा. पं. जगन्नाथ शास्त्री तैलङ्ग	रु.३५०	रु.२५०
२०.	**ब्रह्मसूत्रशाङ्करीवृत्तिः**		
	— सम्पा. पं. केदारनाथ त्रिपाठी	रु.२५०	रु.१५०
२१.	**सिद्धान्तसारावलिः**		
	— सम्पा. पं. व्रजवल्लभ द्विवेदी	रु.५५०	रु.४००
२२.	**श्री गुरुगीता**		
	— सम्पा. पं. व्रजवल्लभ द्विवेदी	रु.२००	रु.१२५
२३.	**शिवाद्वैतदर्पणः**		
	— शिवानुभव शिवाचार्य	रु.१५०	रु.१००
२४.	**सिद्धान्तशिखामणि मीमांसा**		
	—सम्पा. पं. व्रजवल्लभ द्विवेदी	रु.३५०	रु.२५०
२५.	**देवीकालोत्तरागमः**		
	— सम्पा. पं. व्रजवल्लभ द्विवेदी	रु.१५०	रु.१००
२६.	**Pārameśvarāgama**		
	—Tr. by Dr. Rama Ghose	Rs.700	Rs.550

२७. **संस्कृत वाङ्मय में वीरशैव साहित्य**
—एस. अक्कूरमठ (सम्पा. पं. प्रभुनाथ द्विवेदी) - - रु. १५०

२८. **ऋग्वेदस्यप्रथममण्डलस्य सायणवेंकटमाधव-भाष्ययोस्तुलनात्मकमध्ययनम्**
— डॉ. प्रमोदिनी पण्डा रु.४०० - -

२९. **तन्त्रागमीय धर्म-दर्शन (२ भाग)**
— पं. व्रजवल्लभ द्विवेदी रु.१२०० रु.९००

३०. **साम्ययोगमीमांसा**
— मुकुट बिहारी लाल रु.३५० रु.३००

३१. **भारतीय संस्कृति का समग्र स्वरूप**
— पं. व्रजवल्लभ द्विवेदी रु.३५० रु.३००

३२. **संस्कृत वाङ्मय वल्लरी**
—डॉ. गंगाधर पण्डा एवं डॉ. प्रमोदिनी पण्डा रु.३०० - -

३३. **मुण्डकोपनिषद्**
— सम्पा. पं. जगन्नाथ शास्त्री तैलङ्ग रु.५०० रु.४५०

३४. **वातुलशुद्धाख्यतन्त्रम्**
— सम्पा. पं. व्रजवल्लभ द्विवेदी रु.३०० रु.२००

प्रकाशनाधीन ग्रन्थ

३५. **तन्त्रागमीय ज्ञानकोष**
—सम्पा. डॉ. चन्द्रशेखर शिवाचार्य महास्वामीजी

३६. **श्वेताश्वतरोपनिषद्**
— सम्पा. पं. जगन्नाथ शास्त्री तैलङ्ग

***

दूरभाष : (०५४२) २४५०५४६

शैव भारती शोध प्रतिष्ठानम्

डी. ३५/७७, जंगमवाड़ीमठ,
वाराणसी - २२१ ००१ (भारत)

शैवभारती शोध प्रतिष्ठान
डी. 35/77, जंगमवाडीमठ
वाराणसी-221001

ISBN 81-86768-56-4
Rs. 300/-